International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(6): 07-09
© 2016 IJSR
www.anantaajournal.com
Received: 03-09-2016
Accepted: 04-10-2016

**भावना शुक्ला**
छात्रा–सम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी
पंजीकरण संख्या–4277/5878
श्रमणविद्यासंकाय, संस्कृत विद्या विभाग

**Correspondence**
**भावना शुक्ला**
छात्रा–सम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी
पंजीकरण संख्या–4277/5878
श्रमणविद्यासंकाय, संस्कृत विद्या विभाग

# संस्कृतस्य प्राचीननाटककाराणां कृतिषु राष्ट्रिय भावना

**भावना शुक्ला**

**सारांश**
संस्कृतसाहित्यं निजनगरिमा विषये न केवलं भारतवर्षे अपितु अखिलसंसारे विख्यातमस्ति। विश्वस्य विद्वत्मण्डलम् एकस्वरेण अस्य महिमा गायति। किन्तु दुर्भाग्यस्य विषयः अस्ति यत् अस्माकमेव देशे अनेके जनाः सन्ति; ये इदं साहित्यं केवलं 'रोमानी' अस्ति इति संज्ञां दत्वा अद्यतनस्य संघर्षशीलसमाजस्य कृते अयं सर्वथानुपयोगीति वदन्ति। एतस्य प्रचारं–प्रसारमनावश्यकमिति साधयन्ति। किन्तु प्रत्यक्षे किं प्रमाणम्?भास–कालिदास–शूद्रक–विशाखदत्त–भवभूति–भारवि–माघ–भट्टि–श्रीहर्ष–सुबन्धु–दण्डी–बाण–हर्ष प्रभृतयः स्वनामधन्यकवयः निज़कृतिषु न केवलं साहित्यिक सौन्दर्यमपितु भारतीयसंस्कृतिसभ्यतायाः निदर्शनं राष्ट्रियभावनायाः पोषणमपि च कुर्वन्ति स्म। समाजोपयोगितत्त्वैः परिपूर्णमिदं साहित्यं प्राच्यपाश्चात्ययोः द्वयोरपि कृते सर्वदौबहुमूल्यं भविष्यति।
अस्माकं संस्कृतसाहित्यकारेषु अनेकाः नाटककाराः सन्ति येषां कृतिषु राष्ट्रियभावनायाः सुमधुरं स्वरः श्रूयते। तेषां भासः– कालिदासः –विशाखदत्तः –भवभूतिः– मुरारिः–अनन्तभट्टः–क्षेमेन्द्रः–श्रीहर्ष–विद्यापतिः–नयन चन्द्रसूरिः–चन्द्रशेखरः'– वेङ्कटाध्वरिः–देवराजशर्मा–देवराजशास्त्री इत्यादयः उल्लेखनीयाः सन्ति। किन्तु अतिविस्तारभयेन अस्मिन् शोधपत्रे केवल भासं कालिदासं विशाखदत्तं भवभूतिं च विवेचनार्थं स्वीकरोमि।

**कूट शब्दः** संस्कृतस्य प्राचीननाटककाराणां, कृतिषु राष्ट्रिय

## प्रस्तावना

### (क) भासः

संस्कृतसाहित्याकाशे भासः देदीप्यमाननक्षत्रमिव भासते। अस्य लोकानुरञ् जनप्रधानरूपकेषु भारतीय संस्कृतिशीलशक्तिपरकवर्णनाः प्राप्यन्ते। रामायणमहाभारतयोः आधारितानामेतदीयं रूपकाणां पाठमात्रेणैव प्राचीनभारतीयगरिमां प्रति आकर्षणस्य आत्मीयतायाः स्वाभिमानस्य च भावाः अनुभूयन्ते।
इमानि रूपकाणि राम – लक्ष्मण – हनुमत् – कृष्ण – बलराम – भीष्म – द्रोणाचार्य – प्रभृतीनां वीराणां कौशल्या–सुमित्रा – सीता प्रभृतीनां नारीणां च आदर्शचरित्रैः समन्वितानि सन्ति। राज्यप्राप्त्यर्थं स्वशक्त्या शत्रुदमनस्य प्रेरणां स्वजनानां प्रति प्रेम च स्मारयति।(दूतवाक्यम् 1/24)
अत्र युद्धभूमौ मरणे स्वर्गप्राप्तिः विजयप्राप्तौ यशोलाभस्य च तथ्यात्मकं विवेचनं भारतीयवीराणां निर्भीकतां प्रकटयति (कर्णभारम् 1/12)। भारतीयक्षत्रिणां समृद्धिः सायकाधीना अस्ति (पंचरात्रम् 1/24)। गोरक्षार्थं कृतं युद्धं सर्वथा युक्तियुक्तमस्ति (पंचरात्रम् 2/5)। स्वाभिमानेववपुः भारतीय राज्ञानाम् (उरूभङ्गम् 1/63)। भासनिष्ठ राष्ट्रियभावना तदीयाधिसंख्यकरूपकाणां भरतवाक्येन पूर्णतः प्रकाशिता भवति। अत्र हिमालयात् सागरपर्यन्तं स्वभारतीयवसुन्धरायाः एकातपत्रशासनस्य कामना एवं बलवती अस्ति। प्रजासु सम्पत्ति निवासस्य विपत्तिविनाशस्य च इच्छा स्वदेशरिपुसंहारस्य च भावनां प्रदर्शयति।

### (ख) कालिदासः

संस्कृतकाव्याकाशे कालिदासस्य नाम को न जानाति? अस्य कवेः सप्तरचनाः प्रसिद्धाः सन्ति। तेषुत्रीणि नाटकानि (अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रम्),द्वे महाकाव्ये (रघुवंशम्, कुमारसम्भवम्), द्वे खण्डकाव्ये (मेघदूतम्, ऋतुसंहारम् च) सन्ति। कालिदासस्य काव्यानुशीलनेन प्रतीयते यत् कविरयं भारतभूमेः अनुरागी अस्ति। अस्यकाव्येषु प्राणिमात्रोपयोगिविविध विचाराणां मनोरमं चित्रणं निखिलजगतीतलं प्रति कृतज्ञता–पूर्णात्मीय भावनाया प्रदर्शनम् पदे पदे अवलोक्यते।
नृपस्य रघोः दिग्विजयवर्णनेदं सिद्धयति यत् कालिदासस्य दृष्टेः उत्तरे आहिमालयात् दक्षिणे कन्याकुमारीपर्यन्तं पश्चिमे कम्बोजात् पूर्वे कलिङ्गपर्यन्तमेकस्य सुमहद्भारतराष्ट्रस्य मूर्तिमती परिकल्पनास्तीति (रघु0 चतुर्थ सर्ग0)। इन्दुमतेः स्वयंवरावसरे सुनन्दया प्रदत्तेन नृपाणां परिचयमाध्यमेन मगधः अङ्ग – अवन्ती – माहिष्मती – मथुरा – कलिङ्गः – पाण्ड्य – कोशलादीनामेतेषां विख्यातभूभागानां मनोहारी चित्रणं कृतम् (रघुवंशम्–चतुर्थसर्गम् 6/20–79)। लङ्कायां रावणवधं कृत्वा स्वदेशप्रत्यागमनावसरे पुष्पकविमानारूढ़ो रामः वक्ता सीता च श्रोता इति माध्यमेन भारतीयदक्षिण भागे

स्थितानां समुद्र – पर्वत – पम्पासरोवर – पंचवटी – गोदावरीनदी – अगस्त्याश्रम – शरभङ्गास्म – तपोवन मन्दाकिनीनदी – चित्रकूट – तीर्थराजप्रयाग – सरयूनदी प्रभृतीनां क्रमशः तत्कृतंवर्णनं भारतभूभागं प्रति तदीयां ममतास्थां च प्रकटयति (रघु0चतु0स0, त्रयोदश स0)।

रघुवंशस्य इव मेघदूते अपि यक्षस्य मुखेन मेघमलकापुरेः मार्गनिर्देशन ब्याजेन

कालिदासःरामगिरि–मालवदेश–आम्रकूटगिरि–रेवानदी–दशार्णदेश–विदिशानगरी वेत्रवतीनदीनीचैगिरि निर्विन्ध्यानदीअवन्तीदेश – उज्जयिनीनगरी – शिप्रानदी – महाकालेश्वर – मन्दिर – गम्भीरानदी – देवगिरि – स्कन्दमन्दिर – चर्मण्वतीनदी – ब्रह्मावर्त्तदेश – कुरूक्षेत्र – सरस्वतीनदी – कनखलतीर्थ – गङ्गानदी –हिमगिरि – कौञ्चरन्ध्र – कैलाशगिरि – अलकापुरी – प्रभृतीनां स्थानानां विशेषेण भावूर्ण वर्णनं कृत्वा स्वदेशस्य कृते प्रेमभावमेव प्रकटयति[1] (पूर्वमेघः)। भारतमातुः किरीट इव सुशोभितः पर्वतराजहिमालयस्य वर्णनप्रसग्ङे कवेः लेखनी अलौकिकी मुखरतां प्रदर्शयति। 'देवतात्मा' इति विशेषणं कवेः हृदयस्य श्रद्धां प्रकटयति। हिमालयस्य प्राकृतिकशोभासम्पदायाः वर्णनं पठित्वा मनसि गौरवभावः उदयति। पृथ्व्याः मानदण्डः विविधरत्नौषधीनामाकरः जलशक्तेः स्रोतः विविधवनसम्पदायाः भण्डारः हिमालयः कालिदासस्य काव्ये गिरिराजरूपेण चित्रितः अस्ति। तस्य औषध प्रस्थनाम्नी एका भव्यराजधानी अपि शोभते औषध प्रस्थनाम्नी एका भव्यराजधानी अपित शोभते[2]।(कुमारसम्भवः 6/36–93)।

रघुवंशीयनृपाणां विशेषतायाः वर्णनेन ज्ञायते यत् कालिदासस्य मनसि स्वराष्ट्रं प्रति कल्याणकामना अस्ति। दिलीप–रघु–अज–दशरथ–रामादिभिः नरेशैः कृतान् राष्ट्रयशो वर्द्धक कार्यकलापान स्वकाव्येषु अतिमहत्त्वपूर्णःस्थानमददात्। स्वराष्ट्रस्य सम्यकप्रकारेण भरणं–पोषणकरणे सक्षमं दृष्टवा शाकुन्तलेयस्य नाम 'भरत' इति उद्भावितः[3] (अभिज्ञान 7/33)। तस्य हार्दिकी अभिलाषा अस्तियत् भारतस्य राजानः प्रजायाः योगक्षेमं कुर्वन्तु। अत्र राष्ट्रभाषासंस्कृतस्य सदा उन्नतिः भूयात्[4]।(अभिज्ञान 7/35)।

कालिदासस्य मनसि भारतीय संस्कृतिं प्रति दृढ़विश्वासः स्वाभिमानस्य भावना चेति अस्ति। त्यागः तपश्चर्या तपोवनं चैतत् यत् तत्सर्वंभारतीय संस्कृतेः अभिन्नाङ्गम् अस्ति। अस्य काव्येषु अतीव मनोहरवर्णन पुरस्सरं प्राप्यते। वशिष्ठवाल्मीकि कण्वमारीचप्रभृतीनां ऋषिणामाश्रमस्य वर्णनं पठित्वा भारतीय संस्कृतिं प्रति शिरः श्रद्धावनतो भवति। यदा पाठकः सन्तानार्थं चक्रवर्ती राजादिलीपः स्वपत्नीसुदक्षिणया सह कुलगुरुवशिष्ठस्याश्रमगमनस्य प्रसङ्ग पश्चयति[1] (रघुवंशं प्रथम सर्ग) दिलीपेन रक्षिता नन्दिनीं पश्यति (रघुं द्वितीय संर्ग), नृपः रघुः कौत्सेन वरतन्तोः आश्रमस्य कुशलक्षेमं पृच्छति (रघुं 5/1–11)। गुरुदक्षिणायाः धनराशिं समर्पणाय रघुः कुबेरे आक्रमणतत्परः भवति (रघुं 5/12–35)। सीतायाः मर्मस्पर्शिन पातिव्रतस्य पावनं प्रभावं कथायां पठति (रघुवं0 14 सर्ग, 15 सर्ग), महादेवं स्वपतिरूपेण प्राप्त्यर्थं देवीं पार्वतीं सौन्दर्यस्य त्यागं कृत्वा तपोलीना अवलोक्यते (कुमारसम्भव 6/1–29) एवं स्थलेषु पाठकस्य मनसि भारतीय–संस्कृतिं प्रति आकर्षणस्य आदरस्य निष्ठायाः च गम्भीरभावाः समुत्पद्यन्ते। कथनमिदम् अतियुक्ति सहितः यत् कालिदासस्य काव्येषु भारतराष्ट्रस्य समस्तगौरवपूर्ण प्रतीकाः उपस्थिताः सन्ति।

अयमपि उल्लेखनीयः यत् कालिदासः न केवलं स्वराष्ट्रकृते अपितु निखिलविश्वस्यकृते मंगलकामनां करोति। सः समग्रविश्वे लक्ष्मीसरस्वत्यै समन्वयं कृतवान् (विक्रमोर्वशीयं–5/24)। 'सर्वेभवन्तु सुखिनः सर्वेसन्तु निरामयाः इति भारतीयादर्शस्य पक्षपाती कालिदासः निःसंदेहः विश्वकविः अस्ति।

### (ग) विशाखदत्तः

विशाखदत्तप्रणीते मुद्राराक्षसनाटके चाणक्यराक्षसाभ्याम् कूटनीतिनिपुण राजनिष्ठात्मक गतिविधीनां चित्रणमस्ति। अत्र चाणक्यः सफलतामाप्नोति राक्षसः तु विफलताम्। यद्यपि रूपकोऽयं राजनीतेः कूटप्रयोगेन परिपूर्णमस्ति, तथापि चाणक्येन प्रदत्ताः सम्राटचन्द्रगुप्तं प्रति याः शुभकामनाः सन्ति प्रजायाः कल्याणचिन्तापि चतत् सर्वं प्रकारान्तरेण राष्ट्रियभावनां एव प्रकाशयति। चाणक्यः स्वशत्रुभूतम् अमात्यराक्षसं स्व वशं कृत्वा स्वस्थाने तं सम्राटचन्द्रगुप्तस्य अमात्यं कर्तुमिच्छति स्म। चाणक्यः जानाति यत् राक्षसः परमस्वामिभक्तः बृहस्पतिरिव बुद्धिमान चास्ति। यदि चन्द्रगुप्तस्य अमात्यः राक्षसः भविष्यति तर्हि साम्राज्यस्य सुखशान्तिसमृद्धयः निश्चिताः भविष्यन्ति। अन्यथा सः नन्दवंशं प्रति भक्तिमान अस्ति अतः सदैव प्रजासु विद्रोहभावमुत्पादयितुं प्रयत्नशीलः भविष्यति (मुद्रारा0 1/13–16)। अतः स्वलक्ष्यपूर्त्यर्थे अनेककूटनीतिप्रयोगैः राक्षसं वशीभूतं कृत्वा चाणक्यः तं चन्द्रगुप्तस्य अमात्यपदे प्रतिष्ठापयति (मुद्रारा0 7/6–18)। फलस्वरूपं यः राक्षसः प्रथमं चन्द्रगुप्तस्य शत्रुर्भूत्वा तस्य विनाशस्य इच्छां करोति स्म। सैव राक्षसः अधुना चन्द्रगुप्तस्य शुभचिन्तको भूत्वा ईश्वरं प्रार्थयति यत् सम्राट्चन्द्रगुप्तःम्लैच्छैः आक्रान्तां भारतभूमिं चिरकालात् रक्षतु इति (मुद्रारा0 7/19)।

अत्र अयमपि प्रासंगिकः यत् चाणक्यः स्वप्रतिशोधशमनाय नन्दवंशस्य विनाशमकरोत् किन्तु राक्षसममात्यपदे प्रतिष्ठाप्य समाजस्य श्रीवृद्धिं देशभक्तिभावनां च वर्धयति।

### (घ) भवभूतिः

भवभूतेः काव्यमयीभव्यभावनया कलात्मककल्पनया च संस्कृतप्रेमीजनाः सम्यक्रूपेण परिचिताः सन्ति। आदिकवि वाल्मीकि एव भवभूतिः अपि स्वार्यदेशस्य संस्कृतिंसभ्यतां प्रति च आस्थावानास्ति। कविः वैदिक धर्मपालकान् सगर्वमुल्लिखति। भवभूतेः दृष्ट्या रामरावणयोः युद्धं दृष्ट्वा रावणस्य मंत्री माल्यवान् चित्तोपरोजायते तन्मन्त्रणा पठित्वा इदं तथ्यं सुस्पष्टं भवति। सः अनार्यसंस्कृतेः राक्षसजातेः लंकाराष्ट्रस्य च रक्षार्थं सदैव चिन्तयति। रावणहितेसंलग्नः सः रामस्य विनाशाय प्रयत्नशीलः अस्ति। तदर्थं सः परशुरामं रामस्य विरोधाय उत्तेजितं करोति (महावीर चरितम् 2/विष्कम्भक)। मन्थरायाः शरीरे शूर्पणखां प्रवेश्य रामं वनवासिन कारयति (महावीर0 4/विष्कम्भक) रामस्य विनाशाय बालीं युद्धे प्रर्क्तयति (महावीर0 5/45–63)। सः भेदनीतेः अवलम्बनंग्रहीत्वा भारतस्य अप्रतिमवीर रावणं करोति। सः परशुरामबालीभ्याम् रामस्य विनाशमिच्छति। भारतस्य भाग्येन तस्यै सफलता न लब्धा। रामरावणयोः युद्धम् आर्य–अनार्योः युद्धमासीत्, यस्मिन् रामस्य सेना आर्य देशभारतवर्षस्य रावणस्य सेना च अनार्यदेशलङ्कायाः प्रतिनिधित्वं कुर्वतः। फलस्वरूपं भारतीयजनेषु उत्साहं जनयत् रामस्य विजयः राष्ट्रविजयो मन्यन्ते। भवभूतिः भारतीय भूभागानां वर्णनमतिचित्ताकर्षकरूपेण करोति। रावणवधपश्चात् सीतालक्ष्मणसुग्रीवविभीषकरूपेण करोति। रावणवधपश्चात् सीतालक्ष्मणसुग्रीवविभीषण सहितस्य पुष्पकविमानारूढ़रामस्य स्वदेशप्रतिनिवृत्तिवेलायां मार्गवर्णनं प्रस्तौति (महावीर0 7/7–29)।उत्तररामचरिते चित्रदर्शनप्रसंङ्गे भागीरथीपंचवटी–पम्पासरोवर प्रभृतिस्थान विशेषस्य स्पृहासहितं चित्रणम् (उत्तररा0 1/23–33)। अग्रे शम्बूकवधप्रसङ्गे दण्डकारण्ये आगतेन रामेण दण्डकवन–गोदावरीनदी–पंचवटी इत्यादीनां स्थलानां भावुकतापूर्णं वर्णनं चातीवामनोहारि वर्तते (उ0रामचरितम् 2/13–30)।

राज्यस्य सुव्यवस्थां प्रजायाः सुखं प्रति च भवभूतिः जागरूकः अस्ति। अष्टावक्रेन रामाय महर्षेः सन्देशे सन्देशे स अमुंभावं प्रकटयति (उ0राम0 1/11)। प्रजायाः प्रीत्यर्थे रामः स्वप्रियां सीतां परित्यक्तुं तत्परः अस्ति किन्तु स्वप्रजाजना 'दुर्जनान्' इतिकथनेन सङ्कोचं करोति (उ0राम0 1/12, 1/44)। भवभूतेः मतमस्ति यत् नृपः सदैव राष्ट्रस्य रक्षाय प्रजापालनाय च तत्परः जागरूकः दृढ़संकल्पबद्धः च भवेत्। राष्ट्रस्य कल्याणाय राजा विद्वत्जनां संरक्षणे वसेत् (महावीर0 3/18)। भूवभूतेः मतानुसारं नृपः सदैव प्रजां पालयेत्, आलस्यं त्यक्त्वा राष्ट्र–रक्षा कुर्यात् (महावीर0 7/15, 7/42)।

उपर्युक्त संदर्भानामवलोकनेदं तथ्यं स्पष्टं भवति यत् भवभूतेः काव्यसम्पदायामपि राष्ट्रियभावनायाः पुटमस्ति। राष्ट्रिय भावनया सह भवभूतिः निखित विश्वस्य कृते मंङ्गलकामनां करोति

(मालतीमा0–10/25)। संसारे सर्वेजनाः परस्पर हितानुरागिणि भवेयुः, ईर्ष्यादि दोषाः दूरी भवन्तु सर्वेषां। अतः भवभूतिः अपि राष्ट्रियान्ताराष्ट्रियभावाभ्याम् सर्वथा भरितः कविः अस्ति।

**संदर्भ ग्रन्था**

| रचना | रचनाकारः | अध्याय/श्लोक संख्या |
|---|---|---|
| दूतवाक्यम् | भासः | 1/24 |
| कर्णभारम् | भासः | 1/12 |
| पंचरात्रम् | भासः | 1/24, 2/5 |
| उरुभङ्गम् | भासः | 1/63 |
| रघुवंशम् | कालिदासः | 4 सर्ग, 2 सर्ग, 5 सर्ग/1–11, 6/20–79, 13 सर्ग, 14 सर्ग, 15 सर्ग, 5 सर्ग/12–35 |
| पूर्व मेघः | कालिदासः | प्रकृतिवर्णनम् |
| विक्रमोर्वशीयम् | कालिदासः | 5/24 |
| कुमारसम्भवः | कालिदासः | 6/1–29, 6/36–93 |
| अभिज्ञानशाकुन्तलम् | कालिदासः | 7/33, 35 |
| मुद्राराक्षसम् | विशाखदत्तः | 1/13–16, 7/6–18, 7/19 |
| महावीरचरितम् | भवभूतिः | 2/विष्कम्भक, 4/विष्कम्भक, 5/45–63, 7/7–29, 3/18, 7/15, 7/42 |
| उत्तररामचरितम् | भवभूतिः | 1/23–33, 2/13–30, 1/11–12, 1/44 |
| मालतीमाधवम् | भवभूतिः | 10/25 |